National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 32-34
© 2026 NJHSR
www.sanskritarticle.com

**Snigdha Poddar**
Sanskrit Learning Teacher,
Central Sanskrit University,
New Delhi

**Correspondence:**
**Snigdha Poddar**
Sanskrit Learning Teacher,
Central Sanskrit University,
New Delhi

# देवीपुराणे योगसम्मतेश्वरतत्त्वविमर्शः

**Snigdha Poddar**

**भूमिका-** कोऽयम् ईश्वरः? किं वा तस्य वैशिष्ट्यम्? विषयेऽस्मिन् भिन्नाः जिज्ञासाः अनेके मतवादाश्च परिलक्ष्यन्ते। अतः सर्वासां जिज्ञासानां तथा च सर्वेषां संशयानां वा दूरीकरणाय शास्त्रेषु प्रत्युत्तरं विद्यते। यथा योगदर्शनान्तर्गतेषु षड्विंशतितत्त्वेषु ईश्वरः एकः भिन्नतत्त्वरूपेण प्रतिभाति। तद्वत् पुराणेषु अन्यतमे देवीपुराणे प्रकृतिपुरुषाभ्यां श्रेष्ठतमः ईश्वरः इत्युच्यते। परन्तु किमर्थमुच्यते? इत्यस्य विषयस्य स्पष्टीकरणाय सन्देहनिरूपणाय वा मया शोधपत्रमिदं प्रतिपाद्यते।

योगदर्शने षड्विंशतितमं तत्त्वम् ईश्वरो विद्यते। अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्चक्लेशाः भवन्ति। अस्मिन् विषये साधनपादे सूत्रं वर्तते- "अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्चक्लेशाः"[1] इति। तत्र अविद्या नाम अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या। तदुक्तम्- "अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या"[2] इति। रागद्वेषक्लेशैरुत्पन्नानि शुभाशुभकर्माणि पुण्यपापपदवाच्यानि भवन्ति। पुण्यपापयोः फलं जाति-आयु-सुखदुःखात्मकभोगश्च विपाकपदवाच्यो भवति। तदुक्तम्- "सति मूले तद्विपाको जात्यायुर्भोगाः"[3] इति। व्यासभाष्ये कथितमस्ति यत्- "क्लेशेषु कर्माशयो विपाकारम्भी भवति, नोच्छिन्नक्लेशमूलः। यथा तुषावनद्धाः शालितण्डुला अदग्धबीजभावाः समर्था भवन्ति नापनीततुषा दग्धबीजभावा वा, तथा क्लेशावनद्धः कर्माशयो विपाकप्ररोही भवति नापनीतक्लेशो न प्रसंख्यान्-दग्घक्लेशबीजभावो वेति। स च विपाकस्त्रिविधो जातिरायुर्भोगः"[4] इति। सुखदुःखात्मकभोगजन्या चित्ते स्थिता वासना आशयपदवाच्या भवति। तथाच अविद्यादिपञ्चक्लेश-शुभाशुभकर्म-विपाकाशयश्चेति रहितः ईश्वरो विद्यते। अत एव पतञ्जलिना उक्तम्- "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः"[5] इति। व्यासभाष्ये यथा- "अविद्यादयः क्लेशाः, कुशलाकुशलानि कर्माणि, तत्फलं विपाकः, तदनुगुणो वासनाः आशयाः। ते च मनसि वर्तमानाः पुरुषे व्यपदिश्यन्ते स हि तत्फलस्य भोक्तेति यथा जयः पराजयो वा योद्धृषु वर्तमानः स्वामिनि व्यपदिश्यते। यो ह्यनेन भोगेन अपरामृष्टः स पुरुषविशेषः ईश्वरः"[6] इति। नागोजीभट्टेन प्रणितम्- अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः। कर्म धर्माधरमौ। विपाकाः कर्मफलानिजन्मायुरभोगाः। आशयस्तदनुगुनं संसारसामान्यम्। एतैः अपरामृष्टः कालत्रयेऽप्यरामृष्टः पुरुषविशेष ईश्वर इत्यर्थः। जीवनमुक्तप्रकृतिलीनादिव्यावृत्तये कालत्रयेऽपीति परामर्शशून्यत्वार्थकापरामृष्टपदलब्धम्। यद्यापि जीवा अपि क्लेशादिशून्या एव तेषामन्तःकरणधर्मत्वात्, स्वाश्रयस्वामित्वसंवन्धनेनैव क्लेशाद्यभावस्य विविक्षाणान्न दोषः। जीवा हि तत्फलदुःखादिभोक्तृत्वात् क्लेशाद्याश्रयचित्तस्वामिनः।[7]

देवीपुराणे ईश्वरः प्रकृतिपुरुषाभ्यां श्रेष्ठतमः। तत्रापि ईश्वरः पुरुषात् श्रेष्ठस्तदुक्तम् "पुरुषादीश्वरः परः"[8] इति। स च सर्वभूतस्य सृजनकर्ता, कारणानां कारणम्। उक्तश्च-

**यः श्रेष्ठः सर्वभूतानां कारणानाञ्च कारणम्।**
**तमीशानं शिवं ज्ञात्वा नरो निर्वाणमर्हति।।**[9]

ईश्वरपदार्थः सर्वदा सूक्ष्मोऽनुत्पन्नो निष्क्रियः संसर्गधर्मी च। तदुक्तम्-

**सर्वे सूक्ष्माद्यनुत्पन्नाः सर्वे सर्वगताश्च ते।**
**सर्वे नित्या ह्यकम्पाश्च सर्वे संसर्गधर्मिणः।।**[10]

ईश्वरो विकारपदार्थाद् पृथगतीन्द्रियो निरवयवोऽनुमेयश्च। स च निर्गुणश्चेतनः शुद्धोऽप्रसवधर्मी। ज्ञानकर्तृत्त्वाभोक्तृत्वभावस्तस्य विद्यते। यथा-

**निर्गुणौ चेतनौ शुद्धावुभौ प्रसवधर्म्मिणौ।**
**ज्ञानत्वमथ कर्तृत्वं भोक्तृत्वमुभयोरपि।।**[11]

देवीपुराणे शिवस्तु ईश्वरः। स च एको जगत्पतिः गुणदोषैरलिप्तो निरपेक्ष्य दर्शनकारी सर्वज्ञः सर्वकर्ता। तदुक्तम्-

**एकः पतिः समः पूर्णो अप्राप्तो गुणवृद्धिभिः।**
**निरपेक्षो दर्शकारी सर्वज्ञः सर्वकृच्छिवः।।**[12]

तथापि शिवस्य मायया विमोहितो नरः तस्य स्वरूपं पुर्णतया अवलोकने असमर्थो भवति। दृश्यते तु स केवलं सांख्ययोगमाध्यमेन। तदुक्तम्-

**अस्वतन्त्रमिदं सर्वं जगत् स्थावरजङ्गमम्।**
**यत् सांख्यानाञ्च वुध्यन्ते रुद्रमायाविमोहिताः।।**[13]

भगवान् सर्वदा प्रजानां कार्याय प्रवृत्तो भवति। स कर्मानुयायिना फलं दास्यति। यथा-

**पशूनामर्थसिद्ध्यर्थं सर्वार्थेषु प्रवर्त्तते।**
**कारणात् सर्वभूतानां संसारपरिवर्त्तिनाम्।।**[14]

स तमोगुणान् दुःखं प्रददाति, राजसिकान् राजसिकदुःखम्। तथा च सात्त्विकान् परमं सुखमर्पयति। तदुक्तम्-

**अग्रं दुष्टं तामसानां विधत्ते**
**रदसा दुःखं राजसानां विधत्ते।**
**परमं सौखं सात्त्विकानां विधत्ते**
**कर्मापेक्षा हीश्वरस्य प्रवृत्तिः।।**[15]

ईश्वरपदार्थो नित्य कालेनानवच्छेदकत्वात्। योगवाङ्मये स च स्रष्टृणां ब्रह्मादीनामप्युपदेष्टा, कालेन नावच्छेदकत्वादनादित्वाद्वा। ईश्वरस्य भक्तिविशेषात् प्राप्तस्य ईश्वरानुग्रहकारणात् योगिनः कैवल्यमवाप्नुवन्ति। अतएवोक्तं सूत्रकारेण "ईश्वरप्रणिधानाद्वा"[16]। व्यासभाष्ये यथा- "प्रणिधानाद् भक्तिविशेषादावर्जितः ईश्वरस्त-मनुगृह्नाति अभिध्यानमात्रेण, तदभिध्यानादपि योगिनः आसन्नतमः समाधिलाभफलं च भवतीति"[17] इति। नागेशेन जल्पितम्- "अविद्यास्मितारागद्वेषाभइनिवेशाः कलेशाः। कर्म धर्माधर्मौ। विपाकाः कर्मफलानि जन्मायुर्भोगाः। आशयस्तदनुगुणं संसारसामान्यम्। एतैः कालत्रयेऽप्यपरामृष्टः पुरुषविशेष ईश्वर इत्यार्थः। जीवनमुक्त-प्रकृतिलीनादिवियवृत्तये कालत्रयेऽपीति परामर्शशून्यत्वार्थका-परामृष्टपदलब्धम्। यद्यापि जीवा अपि क्लेशादिशूण्या एव तेषामन्तःकरणधर्मत्वात्, तथापि स्वाश्रयस्वामित्वसंबन्धेनैव क्लेशाद्यभावस्य विवक्षणान्न दोषः। जीवा हि तत्फलदुःखादिभोक्तृत्वात् क्लेशाद्याश्रयचित्तस्वामिनः"[18] इति। चन्द्रिकायां यथा- "क्लेशेति। अविद्यादयः क्लेशाः कर्माणि जात्यायुर्भोगाः आफलविपाकात् चित्ते शेरत इत्याशया वासनास्ताभिर्न संस्पृष्टः अन्येभ्यः पुरुषेभ्यो विशिष्टः ईशानशीलः"[19] इति। तदुक्तं भाष्ये- "यत्र काष्ठाप्राप्तिः ज्ञानस्य स सर्वज्ञः स च पुरुषविशेषः"[20] इति। ब्रह्मादीनां गुरु ईश्वरो वर्तते यतो हि तस्यावच्छेदकः कालो न भवति। तथा च सूत्रम्- "पूर्वेषामपि गुरुः कालेनानवच्छेदात्"[21] इति। व्यासभाष्ये दृश्यते- "पूर्वे तु गुरुवः कालेन अवच्छेद्यन्ते, यत्रावच्छेदार्थेन कालो नोपावर्तते स एष पूर्वेषामपि गुरुः"[22] इति। राजमार्तण्डवृत्त्यां भोजदेवनोक्तं यत्- "आद्यानां स्रष्टृणां ब्रह्मादीनामपि स गुरुरुपदेष्टा, यतः स कालेन नावच्छिद्यते, अनादित्वाद्। तेषां ब्रह्मादीनां पुनरादिमत्वादस्ति कालेनावच्छेदः"[23] इति। नागेशेण जल्पितम्- "स एष ईश्वरः पूर्वेषां पूर्वसर्गोत्पन्नामामपि ब्रह्मविष्णुहरितादीनामपि गुरुः स्रष्टाऽन्तर्यामिविदधया वेदादिद्वारा ज्ञानचक्षुः प्रदश्च कालामव-च्छिन्नत्वात्तेषां कालेन शतवर्षादिनावच्छेदादिति भावः। 'यो ब्राह्मणं विदधति पूर्वं यो वै वेदाश्च प्रहिणेति तस्मै' इति श्रुतेरिति भावः। अस्य च निमित्तकारणत्वात्वान्न प्रकृतिस्वातन्त्रस्वातन्त्र्यक्षतिः। घटे कुलालवत् दण्डादीनां कारणत्वेपि तद्वदेवास्य स्वतन्त्रत्वमपि। अत्रेश्वरस्य सर्वापितृत्ववचनात्सर्वान्तिर्यामित्वेन रूपेण गुरुत्वेन जीवानामपि आत्मेश्वर इति वेदान्तवाक्यार्थोऽपि सूचितः। यो हि यस्याधिष्ठाता स तस्यात्मेति दृष्टम्। यथा वा जीवो देहस्य तेमाविभागलक्षणोऽभेद एव 'अविभागो वचनात्' इति सूत्रेण वेदान्तेऽप्युक्तः। एतन्मूलक एव जीवब्रह्मणोरंशांशिभावव्यवहार इति दिक्। ईस्वरस्य वाचक: प्रणवो भवति "तस्य वाचकः प्रणवः"[24] इति सूत्रं प्रमाणमस्ति। प्रणवस्य जपेन ईश्वरभावनया चित्तवृत्तीनां निरोधो जायते। तथा चोपदिशति गीतायाम्-

**तमेव शरणं गच्छ सर्वभावेन भारत।**
**तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्।।**[25]

शङ्कराचार्येणापि तद्भाष्ये कथितं यत् - "तम् एव ईश्वरं शरणम् आश्रयं संसारातिहरणार्थं गच्छ आश्रय सर्वभावेन सर्वात्मना हे भारत ततः तत्प्रसादात् ईश्वरानुग्रहात् परां प्रकृष्टां शान्तिं परामुपरतिं स्थानं च मम विष्णोः परमं पदमवाप्स्यसि शाश्वतं नित्यम्"[26] इति। दुर्गासप्तशत्यामपि दृश्यते-"तामुपैहि महाराज शरणं परमेश्वरीम्"[27]। अपि च "सैषा प्रसन्ना वरदा नृणां भवति मुक्तये"[28] इति। देवीपुराणेऽपि दृश्यते यत्- "ओमित्येतदनुस्मरेत्"[29] । प्रणव एव साक्षाद् ब्रह्मः। परमं पदञ्च खलु अक्षरम्। उच्यते –

**औँकारः प्रणवो ब्रह्म अक्षरं परमं पदम्।**
**इत्येते ध्यापनोपाया ऋषिभिः परिकीर्तिताः।।**[30]

उपसंहृतिः- देवीपुराणस्य पर्यालोचनेन ज्ञायते यत्- योदर्शनसम्मत ईश्वरः क्लेशादिविपाकेभ्यः अपरामृष्टः। तथैव देवीपुराणोक्त ईश्वरो

गुणदोषैरलिप्तः। परन्तु कर्मानुयायिणा प्रजाभ्यः फलं ददाति। ईश्वरो भक्तानामनुग्रहवशाद् भक्तेभ्यः कैवल्यं प्रददाति। तथैव योगदर्शनेऽपि ईश्वरोपासनाद् भक्तिविशेषाद्वा उपासकाः आसन्नतममं समाधिफलं लभन्ते। ईश्वरस्य वाचकः प्रणवो यथा अत्रास्ति तथैव देवीपुराणे औँकारः प्रणवो वा ब्रह्मरूपेण परिगण्यते। एतेन सर्वेणानुमीयते यत्, देवीपुराणोक्त ईश्वरः तथा योगर्शनसम्मत ईश्वर एक एव। नास्ति उभयोर्मध्ये भेदः। तदेव मया व्यख्याता।

## ग्रन्थपञ्जी

**मूलग्रन्थाः**

*देवीपुराणम्* (महर्षिव्यासविरचितम्), पञ्चाननतर्करत्न(सम्पादक), नवभारत पावलिशार्स, कोलकाता, १म.सं.१४००

*पातञ्जलयोगसूत्रम्* (पतञ्जलिकृतम्), सुरेशचन्द्रश्रीवास्तव(सम्पादक), सुरभारती चौखम्बा प्रकाशन, वाराणसी, २०१५

*पातञ्जलयोगसूत्रम्* (पतञ्जलिकृतम्), स्वामी प्रेमेशानन्द(सम्पादक), उद्बोधन कार्यालय, कलिकाता, २०१४

*श्रीमद्देवीभागवतमहापुराण* (खण्डः१-२), गीताप्रेस, गोरक्षपुर, १सं., २०६७

*श्रीमद्भागवत महापुराणम्* (खण्डः१), गीताप्रेस, गोरक्षपुर, ९सं.२०१३

**सहायकग्रन्थाः**

त्रिपाठी, केदारनाथ, *सांख्ययोगकोशः*, चौखम्बा विद्याभवन, वाराणसी, १म सं १९७४

त्रिपाठी, केदारनाथः, *सांख्ययोगकोशः*, काशीहिन्दुविश्वविद्यालयः, वाराणसी, १म सं १९७४

**पाद टिप्पणी:**

[1] योगदर्शनम्- २।३
[2] तत्रैव- २।५
[3] तत्रैव - २।१३
[4] योगदर्शनम्, व्यासभाष्यम्- २।१३
[5] योगदर्शनम्- १।२४
[6] व्यासभाष्यम्, योगदर्शनम्- १।२४
[7] योगदर्शनम् , नागोजीभट्टवृत्तिः- १।२४
[8] देवीपुराणम् - १०।२। ३
[9] तत्रैव - १०।२। ४
[10] तत्रैव – १०।३। २
[11] तत्रैव – १०।३।५
[12] देवीपुराणम् – १०।३।७
[13] तत्रैव – १०।३।८
[14] तत्रैव – १०।३।९-१०
[15] तत्रैव – १०।३।११
[16] योगदर्शनम् -१।२३
[17] योगदर्शनम् , व्यासभाष्यम्-१।२३
[18] योगदर्शनम् , नागोजीभट्टवृत्तिः -१।२३
[19] योगदर्शनम्, चन्द्रिका -१।२३
[20] योगदर्शनम् -१।२५
[21] तत्रैव -१।२६
[22] व्यासभाष्यम्, योगदर्शनम्-१।२६
[23] योगदर्शनम् , राजमार्तण्डवृत्तिः -१।२६
[24] योगदर्शनम्- १।२७
[25] गीता-१८।६२
[26] शङ्करभाष्यम्, गीता-१८।६२
[27] दूर्गासप्तशती-१३।४
[28] तत्रैव -१।५७
[29] देवीपुराणम् - १०।५।१०
[30] तत्रैव - १०।५।११